हिमसंस्कृतवार्ताः
दैनिकं ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ताः
हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-5 ■ वर्ष-4 ■ अङ्क-98 | 1 | फरवरी 06 2025 | Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य कालयुक्तः वि.सं. २०८१,
कलियुगाब्धः ५१२५ हेमन्तऋतुः
सूर्यदक्षिणायनम् माघ शुक्लपक्षः नवमी
तिथिः माघ 24 प्रविष्टांशः मङ्गलमयः भवेत्

2 बहुकालानन्तरं मनालीमॉलमार्गे हिमपातः, अटलकन्दरा, जालोरीदर्रा च अवरुद्धौ, लाहौल-स्पीतौ हिमवृष्टिः

3 प्रधानमन्त्रिणा सङ्गमे अवगाहनं कृत्वा वसुधैव कुटुम्बकम् इत्यस्य सन्देशः दत्तः

5 निरुक्तमिति वेदाङ्गं वेदपुरुषस्य श्रोत्रम् इति कथितम्। एतस्य वेदाङ्गस्य द्वौ एव अधिकृतग्रन्थौ प्राप्येते- निघण्टुः तथा यास्ककृतं निरुक्तम्।

## सुभाषितम्

**अतितृष्णा न कर्त्तव्या,**
**तृष्णां नैव परित्यजेत्।**
**शनैः शनैश्च भोक्तव्यं,**
**स्वयं वित्तमुपार्जितम्॥**

हिन्द्यर्थः-बहुत अधिक इच्छाएँ करना सही नहीं है और इच्छाओं का त्याग कर देना भी सही नहीं है। अपने उपार्जित (कमाए हुए) धन के अनुरूप ही इच्छा करना चाहिए वह भी एक बार में नहीं बल्कि धीरे धीरे।

# ५७.८९ प्रतिशतं मतदानेन दिल्लीविधानसभा-निर्वाचनस्य सर्वेषु ७० आसनेषु मतदानं सम्पन्नम्,

**हिमसंस्कृतवार्ताःनवदेहली।** गतगुरुवासरे दिल्लीविधानसभानिर्वाचनस्य सर्वेषु ७० आसनेषु मतदानं सम्पन्नम् जातम्। सायं ६ वादनपर्यन्तं राजधान्यां ५७.८९ प्रतिशतं मतदातारः मतदानं कृतवन्तः । अस्मिन् काले ६९९ अभ्यर्थीनां भाग्यं ईवीएम-मध्ये गृहीतम् । ८ फरवरी दिनाङ्के परिणामस्य घोषणा भविष्यति। पूर्वोत्तरदिल्लीनगरे सर्वाधिकं मतदानप्रतिशतं ६३.८३ प्रतिशतं, दक्षिणपूर्वदेशे च न्यूनतमं ५३.७७ प्रतिशतं च आसीत् ।

भाजपा सांसदः मनोज तिवारिण संसदीयं निर्वाचनक्षेत्रमस्ति यत्र विगतेषु 12 वर्षेषु न्यूनतमं मतदानमस्ति। आम आदमीपक्षः तृतीयवारं सत्ताप्राप्त्यर्थं संघर्षे व्यस्तः अस्ति, तत्र भाजपा-काङ्ग्रेस-पक्षः अपि दिल्ली-नगरस्य सिंहासनं ग्रहीतुं संघर्षं कुर्वन्तः सन्ति । भाजपा २५ वर्षाणाम् अधिकं कालात् सत्तातः बहिः अस्ति। यत्र आम आदमीदलात् पूर्वं काङ्ग्रेसः १५ वर्षाणि यावत् सत्तायां आसीत्, परन्तु गतनिर्वाचनद्वये दलं एकमपि आसनं प्राप्तुं न शक्तवान्। निर्वाचनरणे प्रमुखप्रत्याशिनः आम आदमी पार्टीति-दलस्य राष्ट्रिय-संयोजकः अरविन्दकेजरीवालः दिल्ल्याःमुख्यमन्त्री आतिशी दिल्ल्याः मन्त्री गोपालरायः भाजपेतिदलीयाः विजेन्द्रगुप्ता प्रवेशवर्मा रमेशबिधूडी कलाशगहलोतः च वर्तन्ते।



कांग्रेसदलस्य संदीपदीक्षितः हारूनयुसूफः अल्कालाम्बाः च विद्यन्ते। राष्ट्रिय-राजधान्यां स्वतन्त्रं निष्पक्षं शान्तिपूर्णं च मतदानं सुनिश्चितुं व्यापकप्रबन्धनं विहितमस्ति। सप्ततिविधानसभाक्षेत्रेषु भूयोऽपि सप्तशतोत्तर-त्रयोदशसहस्रं यावत् मतदानकेन्द्राणि स्थापितानि। उपराष्ट्रपति जगदीप धनखड़ अवोचत् यतृ मतदानं लोकतन्त्रस्य आधारो वर्तते अपि च प्राणभूत्तवेन वर्तते तेन वार्ताहरच सम्वादे प्रोक्तं यत् मतदानं सर्वेषां अधिकाराणां मूलमन्त्रं विद्यते । तत्रैव मुख्यनिर्वाचनायुक्त राजीव कुमारेन दिल्ली विधानसभायाः सुष्ठु निर्वाचन संचालनाय अधिकारिणां, सुरक्षाबलानां, सममेव अन्येषां प्रयासानां प्रशंसां विहिता। दिल्ल्याः उपराज्यपालः विनय कुमार सक्सेना सर्वान् अपि जनान् आग्रहं अकरोत् यत् ते लोकतन्त्रस्य महोत्सवे निष्वप्रचं भाग-ग्रहणं कुर्वन्तु। तेनोक्तं यत् मतदानं जनानां वाणी अस्ति।

### तमिलनाडु-राज्यस्य ईरोड्-पूर्व-विधानसभाक्षेत्रस्य मतदानम्

तमिल्नाडु-राज्यस्य ईरोड्-पूर्व-विधानसभाक्षेत्रस्य, उत्तरप्रदेशस्य मिल्कीपुर्-मण्डलस्य च उप-निर्वाचनस्य मतदानम् अपि सम्पन्नम्। पञ्चवादनं, यावत्, चतुःषष्टिः दशमलव द्वि प्रतिशतं यावत् मतदानं ईरोड्-पूर्वे सञ्जातम्। अपि च पञ्चषष्टिः दशमलव पंचविंशतिः प्रतिशतं यावत् मिल्कीपुरे सञ्जातम्।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
**हिमसंस्कृतम् प्रकाशनम्**
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः - १७७१११

## हिमाचली शिरोस्त्राणवस्त्रं धारयित्वा हस्ते रूद्राक्षं गृहीत्वा प्रधानमन्त्री त्रिवेणी सङ्गमे स्नानं कृतवान्



हिमसंस्कृतवार्ताः, पुनीततिवारी। प्रधानमन्त्री नरेन्द्रमोदी प्रयागराजे महाकुम्भं प्रति गतवान्। स्व-यात्रावधौ श्रीमोदी सङ्गमे पुण्यावगाहनं समाचरितवान्। अत्रावसरे उत्तरप्रदेशस्य मुख्यमन्त्री योगि-आदित्य नाथः उपस्थितो आसीत्। स्वयात्राप्रवासे प्रधानमन्त्री गङ्गा-यमुना-सरस्वती नदीनां सङ्गमतटे त्रिवेणि-सङ्गमे पूजार्चनां विहितवान्। गतमासे नवदशदिनाङ्के स्वीये 'मन की बात' इत्येतस्मिन् कार्यक्रमे प्रधानमन्त्री मोदी उक्तवान् यत् कुम्भः विविधातायाम् एकतायाः उत्सवो विद्यते। विश्वस्य बृहत्तमः एषः समागमः देशविदेशयोः जनानां ध्यानम् आकर्षयति । एतत् महाकुम्भ-मेलकं जनवरीमासे त्रयोदशदिनाङ्के समारब्धम् तावत् साम्प्रतं यावत् अष्टत्रिंशत्कोटिजन पुण्यावगाहनं पवित्रस्नानं समाचरितम्। भारतस्य आध्यात्मिकं सांस्कृतिकं च न्यासं वर्धयितुं संरक्षितुं च प्रशासनस्य प्रतिबद्धतायाः अनुसारं प्रधानमन्त्री मोदी तीर्थस्थलेषु आधारभूतसंरचनानां सौविध्यानां च वर्धनाय अनेकान् पदक्षेपान् उत्थापितवान्। अत्रावसरे केंद्रीय मंत्री किरेन रिजिजू अपि प्रयागराज महाकुम्भे पुण्यावगाहनम् आचरितवान्। तेनोक्तं यत् महाकुम्भोऽयं चतुः चत्वारिंशतधिकशत वर्षाणामनन्तरं आयाति । तदर्थं पुण्यकाले विषयोऽयं अधिकृत्य राजनीति न कर्तव्या।

## संयुक्तराष्ट्र-मानवाधिकार-परिषदः 'यू एन एच आर सी' इत्यतः पृथक्भविष्यति अमेरिकादेशः

हिमसंस्कृतवार्ताः। अमेरिका देशस्य राष्ट्रपतिना डोनाल्ड ट्रम्पेन संयुक्तराष्ट्र मानवाधिकार परिषदः 'यू एन एच आर सी' इत्यतः अमेरिकि देशं पृथक्कर्तुं कार्यकारी आदेशे हस्ताक्षरितम्। अस्मिन् अमेरिकाद्वारा संयुक्तराष्ट्रस्य माध्यमेन फिलस्तीनी शरणार्थिनां कृते भविष्ये कस्यापि आर्थिकसहयोगे प्रतिबन्धः भविष्यति, तत्रैव अमेरिकीराष्ट्रपतिः डोनाल्ड ट्रम्पः अप्रत्याशितघोषणाम् अकरोत्। ट्रम्पः उक्तवान् यत् अमेरिका गाजापट्टिकां 'अधिग्रहणं करिष्यति', 'तस्य नियन्त्रणं करिष्यति', तत्र आर्थिकविकासं च करिष्यति, येन जनानां कृते बहूनि कार्याणि भविष्यन्ति। इजरायलस्य प्रधानमन्त्री बेन्जामिन नेतन्याहू इत्यनेन सह व्हाइट हाउस् इत्यत्र संयुक्तपत्रकारसम्मेलने ट्रम्पः एतत् अवदत्।

## केन्द्रीय गृह-मन्त्री भयोत्पादनस्य विरुद्धय शून्य-सहिष्णुता नीतिं स्वीकृत्य जम्मू-कश्मीर्-प्रदेशे कार्यं कर्तुं निर्दिष्टवान्

हिमसंस्कृतवार्ताः। केन्द्रीय गृह-मन्त्री अमितशाहः नवदिल्ल्यां जम्मू-कश्मीरस्य विषये अविरतं द्वितीयदिवसे सुरक्षा-समीक्षा-सभाम् आयोजितवान्। गृहमन्त्रिणः अध्यक्षतायां आयोजितायां सभायां गृहसचिवः गोविन्दमोहनः, सेनाध्यक्षः उपेन्द्र द्विवेदी, अन्ये वरिष्ठाः अधिकारिणः च उपस्थिताः आसन्। गतमासे आयोजितायां समीक्षा-सभायां केन्द्रीय गृह-मन्त्री भयोत्पादनस्य विरुद्धय शून्य-सहिष्णुता नीतिं स्वीकृत्य जम्मू-कश्मीर्-प्रदेशे भयोत्पादनं उन्मूलनाय समन्वितरूपेण कार्यं कर्तुं सर्वान् सुरक्षा-अभिकरणान् निर्देशितवान्। सः क्षेत्रयोजनायाः, शून्य-भयोत्पादनयोजनायाः च कार्यान्वयनं मिशन्-मोड्-मध्ये कर्तुं अवधानं दत्तवान्।

# बहुकालानन्तरं मनालीमॉलमार्गे हिमपातः, अटलकन्दरा, जालोरीदर्रा च अवरुद्धौ, लाहौल-स्पीतौ हिमवृष्टिः



हिमसंस्कृतवार्ताः- मनाली।

कुल्लूमण्डलस्य पर्यटननगर्यां मनाल्यां बहुकालानन्तरं हिमपातः दृश्यते, तत्र लाहौल- स्पितिः अपि श्वेतवर्णीयेन हिमपत्रेण आवृता अस्ति। एतादृश्यां परिस्थितौ प्रातःकाले मनाली-मॉलमार्गे हिमपातं दृष्ट्वा पर्यटकाः अपि स्वहोटेलात् बहिः आगत्य हिमे विनोदं कर्तुम् आरब्धवन्तः। एतदतिरिक्तं मनालीतः अटलकन्दरामार्गः अपि वाहनानां गमनाय निरुद्धः अस्ति। अटलकन्दरायाम् अपि सार्धपादाधिकं हिमपातः अभवत्। गतरात्रेः आरभ्य कुल्लुमण्डलस्य निम्नक्षेत्रेषु वर्षा भवति, उपरितनक्षेत्रेषु तु हिमपातः अभवत्। उपमण्डलं बञ्जार-आनी च सम्बद्धं जालोड़ी-दर्रा अपि हिमपातस्य कारणेन निरुद्धः अस्ति। एतादृशे सति आनी उपमण्डलस्य जनान् अधुना मण्डीमार्गेण जिलामुख्यालयं प्राप्तव्यं भविष्यति। विगतदिनेषु लाहौल-स्पीतौ हिमपातः अभवत्, परन्तु गतरात्रेः कारणात् अनेकेषु क्षेत्रेषु एकपादाधिकं हिमपातः सञ्चितः अस्ति, अद्यापि हिमपातः निरन्तरं वर्तते। लाहौल-उपत्यकायाः अनेकेषु ग्राम्यक्षेत्रेषु अपि हिमवृष्टिः प्रचलति, यस्मात् कारणात् सम्पूर्णा उपत्यका तीव्रशीतस्य ग्रहणे अस्ति। मनालीविषये वदन् बहुकालानन्तरं मनाली-मॉल-मार्गे परिसरे च हिमपातः अभवत्। हिमपातस्य कारणेन पर्यटकानां संख्या वर्धते, अत्र मन्दः पर्यटनव्यापारः अपि वर्धते। उपत्यकायां हिमपातेन वाहनानां गतिः प्रभाविता इति लाहौल-स्पीति-एसपी मयंक चौधरी अवदत्। एतादृशे सति बीआरओ मार्गेभ्यः हिमस्य निष्कासनस्य कार्यम् अपि आरभेत तदनन्तरमेव लाहौल-उपत्यकायाः आन्तरिकक्षेत्रेषु वाहनानां गमनम् सम्भवं भविष्यति। अटलकन्दरायाः समीपे सार्धपादाधिकं हिमपातः अभवत्, यस्मात् कारणात् एषा कन्दरा तावत्पर्यन्तं वाहनानां गमनाय निरुद्धा अस्ति।

# HPSEBL Employees : सर्वकारस्य विरुद्धं हमीरपुरतः विरोधं करिष्यन्ति विद्युत्कर्मचारिणः, ७०० पदानाम् उन्मूलनस्य निर्णयस्य निवृत्तेः याचना



हिमसंस्कृतवार्ताः- शिमला।

राज्यविद्युत्मण्डलस्य कर्मचारिणः ११ फरवरी दिनाङ्के हमीरपुरतः काङ्ग्रेससर्वकारस्य विरोधस्य गुञ्जनं ध्वनयिष्यन्ति। बुधवासरे शिमलानगरस्य विद्युत्मण्डलस्य मुख्यालयस्य कुमारहाउसस्य बहिः ७०० पदानाम् उन्मूलनस्य निर्णयस्य निवृत्तेः आग्रहं कृत्वा प्रदर्शनं कृतम्। पुरातनवृत्तियोजनायाः पुनर्स्थापनं न भवति, नवीननियुक्तिः न भवति, अवशिष्टवित्तीयलाभानां भुक्तिः न भवति इति विषये आक्रोशं प्रकटयन् कर्मचारिणां, पेन्शनधारकाणां, अभियंतॄणां च संयुक्तमोर्चा राज्ये सर्वत्र आन्दोलनं तीव्रं कर्तुं सचेतनाम् अयच्छत्। बुधवासरे मध्याह्नभोजनविरामसमये प्रतीकात्मकविरोधं कुर्वन्तौ संयुक्तमोर्चायाः संयोजकः लोकेशठाकुरः सहसंयोजकः हीरालालवर्मा च विद्युत्मण्डलस्य संरचनायां छेदनं न सहते इति अवदताम्। यदि सर्वकारः प्रबन्धनवर्गश्च तर्कीकरणस्य प्रक्रियां न स्थगयति तर्हि सम्पूर्णे राज्ये आन्दोलनं तीव्रं भविष्यति। सः अवदत् यत् संयुक्तमोर्चायाः मुख्या आग्रहः अस्ति यत् विद्युत्मण्डले पुरातनवृत्तिः पुनः स्थापनीया। बोर्डे युक्तिकरणस्य नाम्ना पदानाम् उन्मूलनं स्थगितव्यम्। शीघ्रमेव नूतननियुक्तिः आरब्धा भवेत्। २०१० तमस्य वर्षस्य जूनमासे विद्युत्कर्मचारिभिः अभियन्तृभिः च सह कृतस्य सहमति- कार्यान्वयनकाले विद्युत्मण्डलस्य छेदनं कर्तुं न शक्यते। एतस्य निर्णयस्य उल्लङ्घनं न कर्तव्यम्। बोर्डे पेन्शनभोक्तृणां सेवानिवृत्तिलाभं पेन्शनावशिष्टं च शीघ्रं दातव्यम्। बहिः निर्मितकर्मचारिणां कृते स्थायीनीतिः निर्मातव्या भविष्ये बहिः निर्मितनियुक्तिः स्थगितव्या। उपकेन्द्राणां विद्युत्गृहाणां च संचालनम्, अनुरक्षणं च आउटसोर्सिंग स्थगितव्यम्। अस्मिन् अवसरे कर्मचारिणां अभियंतॄणां च विभिन्नसंस्थानां प्रतिनिधिनाम् अतिरिक्त पेन्शनधारकाः ए. एस. गुप्ता, चन्द्रसिंहमण्डलालः, महेशश्रीधरः, कुलदीपखरवाडा च सभां सम्बोधनं कृतवन्तः।

## हमीरपुरे 11 फरवरी दिनांके जिलापंचायतः

लोकेशः अवदत् यत् 11 फरवरी दिनांके हमीरपुरे जिलापंचायतस्य आह्वानं कृतमस्ति। अस्मिन् काले विद्युत्मण्डलप्रबन्धनस्य नीतीनां विरुद्धं आक्रमणं भविष्यति, भविष्यस्य रणनीतिः च प्रकाशिष्यते

## १३ दिनाङ्के हिमाचलप्रदेश-मन्त्रिमण्डलस्य गोष्ठी, बजटसत्रस्य तिथौ निर्णयः भवितुं शक्नोति

हिमसंस्कृतवार्ताःशिमला। हिमाचलप्रदेशमन्त्रिमण्डलस्य गोष्ठी १३ फरवरी दिनाङ्के प्रातः ११ वादने राज्यसचिवालये भविष्यति। बजटसत्रस्य तिथयः निर्धारयितुं सभायां निर्णयः भवितुं शक्यते। बजटसत्रं फरवरीमासस्य अन्तिमसप्ताहे अथवा मार्चमासस्य प्रथमसप्ताहे भवितुं शक्नोति। एतदतिरिक्तं राज्यमन्त्रिमण्डलसभायां न्यूनबालानां विद्यालयानां विलयनविषये निर्णयः अपि गृहीतुं शक्यते। मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः अध्यक्षतायां आयोज्यमानायां गोष्ठ्यां अन्ये बहवः महत्त्वपूर्णाः निर्णयाः अपि स्वीकर्तुं शक्यन्ते।

# हिमाचलप्रदेशे कैंसररोगिणां दुःखम्

हिमसंस्कृतवार्ताः- डॉ. पद्मनाभः, शिमला।

शिमलायाः आईजीएमसी चिकित्सालयस्य टरशरी कैंसर केयर केन्द्रस्य स्थितिर्दुःखदा अस्ति। अत्र उपचारं प्राप्नुवन्तः रोगिणः अनेकान् कष्टान् सहन्ते। नन्दलालः, यो मण्डी-गोहर प्रदेशस्य निवासी अस्ति, फुफ्फुसः-कैंसररोगेण पीडितः अस्ति। स सप्तमासात् उपचारं प्राप्नोति। शरीरं दुर्बलं जातं, स्वयम् औषधालयं गन्तुं शक्तिः नास्ति। औषधालयं चिकित्सालयतः दूरम् अस्ति, यस्मात् रोगिणः क्लेशं अनुभवन्ति।

कीमोथैरेपी एवं रेडियोथैरेपी कर्तृभ्यः रोगिभ्यः दीर्घकालं चिकित्सालये स्थातुम् आवश्यकम्। किन्तु आश्रय-गृहाणां अभावः अस्ति, येन ते गुरुद्वारेषु अथवा अन्यत्र अतिव्ययं कृत्वा स्थातुम् बाध्याः भवन्ति। किन्नौरप्रदेशीयः खेमराजः कथयति यत् तस्य श्वशुरस्य उपचारः तृतीय मार्चमासपर्यन्तं भविष्यति। सः चिकित्सालये प्रवासं करिष्यति, किन्तु शीतात् संरक्षणाय यथोचितव्यवस्था नास्ति। सुन्दरनगर-निवासिनी निर्मला, या गर्भाशय-कैंसर-रोगिणी अस्ति, कथयति यत् सा आयुष्मान-योजनायाः अन्तर्गतं उपचारं प्राप्नोति, किन्तु औषधीनां क्रयणाय अर्थाभावः अस्ति।

आईजीएमसी चिकित्सालये कर्मचारीणां न्यूनता अस्ति। कीमोथैरेपी-विभागे केवलं षोडश शय्याः सन्ति तथा सप्तदश पीठेषु रोगिणः उपचारं प्राप्नुवन्ति। यदि वार्ड-विस्तारः भवेत्, तर्हि अधिकाः सुविधाः उपलब्धाः भविष्यन्ति। चिकित्सालयस्य प्रशासनं वदति यत् यदि कर्मचारिणः नियुक्ताः भवन्ति, तर्हि द्वौ सत्रौ आयोजनीयं, येन अधिकाः रोगिणः लाभं प्राप्नुयुः।

रेडियोथैरेपी- विभागाध्यक्षः डॉ. मनीषगुप्ता कथयति यत् अतिरिक्तकर्मचारीणां आवश्यकता प्रशासनाय निवेदिता अस्ति। यदि कर्मचारीणां नियुक्तिः भवेत्, तर्हि उपचारव्यवस्था उत्तमा भविष्यति इति।

# क्रीडावार्ताः- हिमाचलेन ताइक्वाण्डो- क्रीडायां त्रीणि स्वर्णपदकानि प्राप्तानि



हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।

राष्ट्रियपूम्सेताइक्वाण्डो प्रतियोगितायां हिमाचलेन उत्तमं प्रदर्शनं कृत्वा त्रीणि स्वर्णपदकानि प्राप्तानि। भारतस्य ताइक्वाण्डो महासंघेन २८ तः ३१ जनवरीपर्यन्तं तेलङ्गाना-राज्यस्य हैदराबादे एषा प्रतियोगिता आयोजिता आसीत्। प्रतियोगितायां सर्वेषां राज्यानां वरिष्ठाः पुरुषाः महिलाः च क्रीडकाः भिन्न-भिन्नवर्गेषु स्वस्य सामर्थ्यं प्रदर्शितवन्तः। शिमलापुलिसविभागस्य ताइक्वाण्डोप्रशिक्षकः, हवलदारः च कमलकिशोरः वरिष्ठः अन्तः-५० आयुवर्गे पूमसे व्यक्तिगतवर्गे प्रथमं स्वर्णपदकं प्राप्तवान्। एतत् तस्य चतुर्थं राष्ट्रियपदकम् अस्ति। वरिष्ठपूमसे पूमसाए व्यक्तिगतविशेष- बधिरवर्गे घनश्यामः भारद्वाजः द्वितीयं स्वर्णपदकं प्राप्तवान्। घनश्यामः राज्यस्य डिजिटलप्रौद्योगिकी-शासनविभागे डाटा- प्रविष्टि-सञ्चालकरूपेण कार्यं कुर्वन् अस्ति। तृतीयं स्वर्णपदकं पुरुषाणाम् अन्तः-५० आयुवर्गस्य दले राजपालः, कमलकिशोरः, घनश्यामः भारद्वाजः च पूमसे वरिष्ठवर्गस्य स्पर्धायां प्राप्तवन्तः। स्वर्णपदकविजेतॄणां शिमलानगरं प्रत्यागत्य रिड्ज- क्रीडाङ्गणे स्वागतं कृतम्। पदकविजेताः स्वसफलतायाः श्रेयः हिमाचलप्रदेशे ताइक्वाण्डोक्रीडायाः संस्थापकं प्रशिक्षकं च विनोदकुमारं दत्तवन्तः।

# प्रधानमन्त्रिणा सङ्गमे अवगाहनं कृत्वा वसुधैव कुटुम्बकम् इत्यस्य सन्देशः दत्तः
## *वैदिकमन्त्राणां श्लोकानां च उच्चारणे पवित्रम् अवगाहनं कृतवान् प्रधानमन्त्री मोदी*

**हिमसंस्कृतवार्ताः- महाकुम्भनगरम्, 5 फरवरीमासः।** प्रधानमन्त्री नरेन्द्र मोदी इत्यनेन बुधवासरे प्रयागराजमहाकुम्भे गंगा- यमुना- सरस्वती इत्येतेषां त्रिवेण्यां पवित्रसङ्गमे पवित्रम् अवगाहनं कृत्वा सम्पूर्णं विश्वम् एकतायाः सन्देशः दत्तः। वैदिकमन्त्रजापस्य मध्ये प्रधानमन्त्री मोदी पूर्णश्रद्धया भक्त्या च त्रिवेणी संगमे स्नानं कृतवान्। पवित्रं डुबकीं ग्रहीतुं पूर्वं प्रधानमन्त्री सूर्यभगवे अर्घ्यम् अर्पितवान्। एतस्मिन् काले सः रुद्राक्षमालाजपं कुर्वन् अपि दृष्टः। गंगा, यमुना, सरस्वती च पूजां कुर्वन् पवित्रं स्नानम् अकरोत्। मज्जनं कृत्वा गंगापूजां आरतीं च चकार च। पूर्वं प्रयागराजनगरे प्रधानमन्त्रिणः आगमनसमये मुख्यमन्त्री योगी आदित्यनाथः तस्य स्वागतं कृतवान्।

### यथाविधि विहितं अर्चनं, पूजनं च

त्रिवेणी संगमे डुबकी मारनात् पूर्वं प्रधानमन्त्री नरेन्द्रमोदी विधिपूर्वकं पूजां कृतवान्। संगमप्रवेशात् पूर्वं प्रधानमन्त्री प्रथमं श्रद्धया जलं स्पृश्य आशीर्वादं गृहीतवान्, ततः सूर्याय जलं दत्त्वा तर्पणमपि कृतवान्। संगमे स्नानं कृत्वा पूजां च पूर्णविधिना, अनुष्ठानेन च कृतवान्। कृष्णकुर्ता, केसरपट्टिका, हिमाचलीटोपी च धारयन् प्रधानमंत्री मोदी वैदिकमन्त्राणां श्लोकानां च मध्ये संगमत्रिवेणीयां तण्डुलं, प्रसादं, पुष्पं, फलं, रक्तपटं च अर्पितवान्। तदनन्तरं सङ्गमस्थले पुण्यत्रयाणां आरतीम् अपि अकरोत्। तत्र उपस्थितः तीर्थयात्री पुरोहितः तस्मै तिलकं प्रयुज्य अभिनन्दितवान्। पूजायाः अनन्तरं प्रधानमंत्री मोदी मुख्यमन्त्रिणा सह तस्मिन् एव नौकायां उपविश्य पुनः हेलीपैडं प्रति प्रस्थितवान्।

### योगविशेषे स्नानं कृतम्

महाकुम्भ इत्यत्र यत्र विश्वस्य सर्वेभ्यः भक्ताः समागमाः सन्ति, तत्र प्रधानमन्त्री पवित्रेण डुबकीद्वारा एकभारतम्-श्रेष्ठभारतस्य वसुधैव कुटुम्बकमस्य च सन्देशं सम्पूर्णविश्वं प्रति अयच्छत्। बुधवासरे प्रधानमंत्री मोदी इत्यस्य संगमस्नानम् अतीव महत्त्वपूर्णम् ऐतिहासिकं च क्षणम् आसीत्। अस्मिन् काले योगविशेषस्य संयोगः अपि अभवत्। वस्तुतः बुधवासरः विशेषः दिवसः आसीत् यतोहि हिन्दूपञ्चाङ्गानुसारम् अस्मिन् समये गुप्तनवरात्रिः प्रचलति, भीष्माष्टमी अपि बुधवासरे आसीत्। गुप्तनवरात्र्यां यत्र देवीपूजनं भवति, तत्र भीष्माष्टम्यां भक्ताः पूर्वजानां कृते तर्पणं श्राद्धं च कुर्वन्ति।



### प्रयागराजं प्राप्तवतः प्रधानमन्त्रिणः मुख्यमंत्री योगी स्वागतीकृतवान्

प्रधानमन्त्री नरेन्द्रमोदी प्रातःकाले प्रयागराजविमानस्थानकं प्राप्तवान्, ततः सः एम. आई.-17 हेलिकॉप्टरेण डीपीएस-हेलीपैड-नगरं प्राप्तवान्। अत्र मुख्यमन्त्री योगी आदित्यनाथः स्वागतं कृत्वा अभिनन्दनं कृतवान्। इतः प्रधानमन्त्री अरैलघाटं प्राप्य विशेषनौकायाम् आरुह्य त्रिवेणीसंगमं प्रति प्रस्थितवान्। मुख्यमन्त्री योगी आदित्यनाथः अपि तेन सह नौकायाम् उपस्थितः आसीत्। अस्मिन् काले प्रधानमन्त्री महाकुंभस्य कृते कृता व्यवस्था, भक्तानां कृते प्रदत्ताः सुविधाः च विषये मुख्यमंत्री योगी इत्यस्मात् सूचनां गृहीत्वा अपि दृष्टः। नौकायानस्य समये प्रधानमंत्री-महोदयेन त्रिवेणी-संगमे उपस्थितानां भक्तानाम् अभिवादनानि अपि स्वीकृतानि।

### प्रधानमन्त्रिणः सन्निधौ अपि भक्ताः स्नानं कुर्वन्ति स्म

यदा प्रधानमन्त्री नरेन्द्रमोदी त्रिवेणी संगमं प्राप्तवान् तदा सामान्यभक्ताः अपि संगमे स्नानं कुर्वन्ति स्म। प्रधानमंत्रिणः मोदिनः आगमनेऽपि जनाः स्नानं कर्तुं न निवारिताः। विशिष्ट जन- आन्दोलनस्य अनन्तरम् अपि कुत्रापि गतिरोधः नासीत्। एकप्रकारेण प्रधानमंत्री मोदी भक्तः मिलित्वा त्रिवेणीसंगमे पवित्रम् अवगाहनं कृतवन्तः। एतेन भक्ताः अपि प्रसन्नाः प्रतीयन्ते स्म, संगमस्य तटे लक्षशः जनानां सान्निध्ये हर हर गङ्गायाः, मोदी- मोदी इत्यस्य च जपाः प्रतिध्वनिताः आसन्। उल्लेखनीयं यत् 13 जनवरी दिनाङ्के आरब्धस्य महाकुम्भस्य वीवीआईपी- आन्दोलनस्य अभावेऽपि भक्तानां संगमे स्नानस्य किमपि समस्यां न सम्मुखीभवति। अस्य परिणामः अस्ति यत् केवलं 24दिवसेषु अधुना यावत् 39 कोटिः भक्ताः संगमे पवित्रम् अवगाहनं कृतवन्तः।

### 13 दिसम्बर दिनाङ्के प्रधानमंत्री मोदी अनेकाः परियोजनाः प्रारब्धवन्तः

ततः पूर्वं प्रधानमंत्री महाकुम्भस्य आरम्भात् एकमासपूर्वं 13दिसम्बर दिनाङ्के प्रयागराजं गत्वा 5500 कोटिरूप्यकाणां 167 परियोजनानां घोषणां कृतवान् आसीत्। अस्मिन् यात्रिकसुविधानां कृते रेलस्थानकानाम् उन्नयनं, विकासं च सह मार्गानाम् विस्तारः, सुदृढीकरणं, सौन्दर्यीकरणं च इत्यादीनि प्रमुखाः परियोजनाः अन्तर्भवन्ति स्म एतदतिरिक्तं स्थायिघाट्, नदीतट, सीवरेज, पेयजलसुविधाभिः सह विद्युत्प्रदायेन सह सम्बद्धाः परियोजनाः अपि प्रारब्धाः। एतासां परियोजनानां गलियाराणां च प्रारम्भस्य उद्देश्यं न केवलं महाकुम्भस्य अनुभवं भक्तानां कृते स्मरणीयं कर्तुम् अपि तु पवित्रनगरं प्रयागराजं प्रति प्रगतेः नूतनां दिशं दर्शयितुम् अपि आसीत्।

# चक्रवर्तीराजाभरतस्य जन्मस्थल्यां स्वयंसेवकैः स्वच्छतायाः संकल्पः सेवाभियाने स्वीकृतः



हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला, कण्वनगरीकोटद्वारम्। यत्र हस्तिनापुरस्य राजा दुष्यन्तः शकुन्तलायाः च गन्धर्वविवाहानन्तरं भरतः जन्म लब्धवान्। कालान्तरे चक्रवर्तिनः राजानः भरतनाम्ना देशस्य नाम "भारतं" जातम्। तत्र वेद-ऋचानां घोषैः गुंजायमानं विशुद्धं वातावरणम्, पवित्रस्य होमधूमेन व्याप्तः सघनवनः, विद्यार्थिनाम् अध्ययनक्रियाभिः संस्कृतयः सभ्यतायश्च संरक्षिताः। मालिनीनद्याः उभयतटे लघ्वाश्रमाः दृश्यन्ते, यत्र ऋषिमुनयः परम्परागतरीत्या शिक्षाप्रदानं कुर्वन्ति। तत्रैव कण्वाश्रमगुरुकुले अद्यापि तादृशी शिक्षापद्धतिः दृश्यते। कण्वाश्रमः उत्तराखण्डराज्यस्य गढ़वालजनपदे कोटद्वारक्षेत्रे शिवालिकपर्वतश्रेणौ स्थितः अस्ति। सः हेमकूट-मणिकूट-पर्वतयोः मध्ये स्थितः, पुरातात्त्विक- ऐतिहासिकदृष्ट्या महत्त्वपूर्णः पर्यटनस्थलः अस्ति। मालिनीनद्याः तीरे घनवनानां मध्ये स्थितः अयम् आश्रमः पवित्रः, प्राचीनः चेति मन्यते। अत्र ऋषिः कण्वः विश्वामित्रश्च ध्यानमभवताम्। कण्वाश्रमे वेदानां चत्वारः, व्याकरणं, छन्दः, निरुक्तं, ज्योतिषं, आयुर्वेदः, कर्मकाण्डश्च पाठ्यन्ते स्म। वसन्तपञ्चमीपर्वणि, त्रिदिवसीयकण्वाश्रम-महोत्सवस्य समापनानन्तरं, अनेकैः राष्ट्रियसेवायोजनास्वयंसेवकैः, पर्यावरणमित्रैः, समाजसेविभिश्च सह वृहद-स्वच्छता-अभियानं सञ्चालितम्। तस्मिन् पवित्रक्षेत्रस्य स्वच्छतायै सर्वैः अमूल्यं योगदानं प्रदत्तम्। महोत्सवसमितेः पदाधिकारीगणाः, एम. के. वी. एन. कलालघाटी कोटद्वारं, राजकीय- इंटर- कॉलेज- झंडीचौड़, कन्याविद्यालय- कलालघाटी कोटद्वारम् इत्येताभ्यः विद्यालयेभ्यः स्वयंसेवकाः, ग्रीन-आर्मी-देवभूमिः उत्तराखण्डः इत्यस्य सदस्याः च अस्मिन् अभियाने भागं गृहीतवन्तः। अस्मिन् कार्यक्रमे, महोत्सवसमितेः अध्यक्षः कण्वाश्रमस्य ऐतिहासिक- पौराणिक- महत्त्वं स्वयंसेवकेभ्यः अवगतं कृतवान्। सः सर्वेभ्यः आवाहनं कृतवान्- स्वच्छतायाः संकल्पः, सेवा अभियानम् इति स्वीकरणीयम्। इत्येतं ध्येयं पूरयित्वा, महोत्सवस्य समापनानन्तरं, पतितपावनी मालिनीनद्याः तटे स्थितः एषः कण्वाश्रमः राष्ट्रीयधरोहरः अस्ति अतः सर्वे आगन्तुकाः स्वच्छतायाः विशेषं ध्यानं कुर्वन्तु। अस्माकं गौरवविषयं मलिनीकृत्य शर्मयन्तु मा। अस्मिन् स्वच्छताभियाने राष्ट्रीयसेवायोजना-कार्यक्रमाधिकारी नीतेशवर्यः (एम. के. वी. एन. कलालघाटी कोटद्वारं), ऋतुसिंहः, भावना पाण्डेयः (राजकीय- कन्या- इंटर- कॉलेज- कलालघाटी-कोटद्वारं), ग्रीन-आर्मी-देवभूमेः अध्यक्षः शिवमः नेगी, महोत्सवसमितेः अध्यक्षः राजगौरव नौटियालः, सहसंयोजकौ वीरेंद्रभारद्वाजः, जगमोहनरावतः, सदस्याः मोहितकंडवालः, आशुनेगी, मनीषभट्टः, जगतरामडबरालः, राजेंद्रप्रसादः, शशिकांतजोशी, प्रमोदजोशी, विजयप्रकाशः ध्यानी, रजनीशबेबनी, आशीषरौतेला, गौरवरावतः इत्येते पर्यावरणमित्राः स्वयंसेवकाः च उपस्थिताः आसन्।

# सूर्यसप्तमी -अद्वितीयः उपासना मुहुर्तः

**हिमसंस्कृतवार्ताः- जगदीशडाभी**

**ध्येय सदा सवितृमंडलमध्यवर्ती,**
**नारायणः सरसिजासनसन्निविष्टः।**
**केयूरवान् मकरकुण्डलवान् किरीटी,**
**हारी हिरण्मय वपुधृत शंख चक्रः।।**

ॐ मित्राय नमः, ॐ रवये नमः, ॐ सूर्याय नमः, ॐ भानवे नमः, ॐ पूष्णे नमः, ॐ हिरण्यगर्भाय नमः, ॐ मरीचये नमः, ॐ आदित्याय नमः, ॐ सवित्रे नमः, ॐ भास्कराय नमः, ॐ अर्काय नमः, ॐ श्री सवितृसूर्यनारायणाय नमः।

**आदित्यस्य नमस्कारान् ये कुर्वन्ति दिने दिने।**
**आयुर्प्रज्ञा बलम् वीर्यं तेजस्तेषां च जायते।**

एषः उत्सवः माघमासस्य शुक्लपक्षस्य सप्तम्यां तिथौ आयोजितः। राजकीयः उच्चमाध्यमिकः छापराड़ीग्रामे आचार्यः बी. एल. बधालायाः माध्यमेन सूर्यनमस्कारम् आयोजितम् आसीत्। अस्मिन् अवसरे छात्रः-छात्राः शिक्षकः- शिक्षिकाश्च त्रयोदशः मन्त्रसहितं सूर्यनमस्कारं कृतवन्तः। प्राचार्यः प्रारम्भिकशिक्षाधिकारी डॉ. धर्मराजमहोदयस्य निर्देशानुसारं प्रभारी ओमप्रकाशबुनकरः, नेतरामधाकड़ः, बबलीसिकरवारः, रामलखनसिंहजाटः, मित्राशर्मा, सुनीताशर्मा, रामवतारयादवः, रणजीतसिंहः इत्यादयः विद्यालयपरिवारस्य अध्यापका उपस्थिताः आसन्।

# राम रक्षा स्तोत्रं वैज्ञानिकसिद्धान्ताश्च




रामरामस्य जपानन्तरं शरीरे ये परिवर्तनाः भवन्ति ते वैज्ञानिकसिद्धान्तेन वर्णिताः सन्ति। यतः अहं न अवगच्छामि , तस्मात् मम पितामहौ, मातुलौ, परस्परं राम राम इति वदन्ति स्म:! भारतीयसेनायां सर्वे अवगच्छामि स्म।

१) 'र' अक्षरस्य उच्चारणं कुर्वन् नाभिसमीपस्थः भागः अन्तः आकृष्यते । तदा अस्माकं मणिपुरचक्रं सक्रियं भवति।

इदं चक्रं नाभिसमीपे अस्ति। तत्र स्थितं विष्णुः अधिष्ठातृदेवता सृष्टेः रक्षकः ।

शरीरस्य मध्यबिन्दुः अर्थात् गुरुत्वाकर्षणकेन्द्रः अस्मिन् चक्रे भवति ।

अस्मिन् चक्रे धारणां कृत्वा सत्त्वगुणः मनसि वर्धते, तस्य स्थिरतां प्रारभते।

महत्त्वपूर्णम् - एकदा वयं शरीरे अस्माकं चक्राणां स्थितिं ज्ञात्वा तदा वयं धारणां कुर्मः (तस्मिन् स्थाने मनः केन्द्रीक्रियते)

यस्मिन् नाडिचक्रस्य उपरि वयं मनः स्थापयामः (कल्पयामः) यत् तस्मिन् चक्रे नाडिनां व्यापारः तस्य वशस्थानां च इन्द्रियाणां सुचारुतया आरभ्यते।

यदि मणिपुर चक्रं बाधितं भवति तर्हि एते रोगाः भवितुम् अर्हन्ति

-अजीर्णता -मधुमेह

-अम्लता -व्रणः

-कोलायटिस -परिशिष्टशोथः

-गुर्दा रोगः -नेफ्रोपैथी।एड्रीनल एताः ग्रन्थिः अतीव महत्त्वपूर्णाः हार्मोनाः उत्पादयन्ति येषां नाम- एड्रेनालिन् तथा कोर्टिसोल्...

यदि एड्रेनालिनस्य स्तरः क्षीणः भवति तर्हि निम्नलिखितपरिणामाः भवन्ति-

- ❑ उच्च रक्तचापः उच्च शर्करा
- ❑ निराशा

यदा दुर्वार्ता प्राप्यते तदा अस्माकं हृदयस्पन्दनं वर्धते, बीपी वर्धते, भयं वर्धते, निरुत्साहः वर्धते, चिन्ता वर्धते...

**।।राम।।**

**किमर्थं तत्?** अतः तस्मिन् समये अस्माकं अधिवृक्कग्रन्थिः अतीव उत्साहितः भवति। एतत् वयं उदरस्य गर्तं वदामः।

इदं आघातं अस्माकं मणिपुरचक्रे भवति हृदये न किन्तु हृदयं प्रभावितं करोति।

ततः अस्माकं प्रणाल्याः तत्क्षणमेव सक्रियः भवति। केचन जनाः तत्क्षणमेव मूत्रविसर्जनम् , केचन जनाः तत्क्षणमेव शौचालयं गन्तुम् अर्हन्ति... एतस्य अर्थः भवति यत् अस्माकं प्रणाल्याः सम्यक् कार्यं कुर्वन्ति।

## राम रक्षा किमर्थं?

मणिपुर चक्रस्य बीजाक्षरं *र*अस्ति । परन्तु केवलं र इति वदन् नीरसता भविष्यति। अस्माकं बुधकौशिकस्य मुनिस्य अस्य विषये दृढं ज्ञानम् आसीत्, अतः सः रामरक्षस्तोत्रं रचितवान् ।

रामरक्षायां * र* अक्षरं कतिवारं दृश्यते ? तत् पश्यन्तु। कल्पयतु यत् र इत्यस्य उच्चारणं कियत्वारं भविष्यति यदि तस्य संशोधनं भवति! तदा चिन्तयतु भवतः मणिपुरचक्रं कियत्वारं दुःखं दास्यति। यदि भवान् किमपि चक्रं सक्रियं कर्तुम् इच्छति तर्हि तस्मिन् एव ध्यानं दातव्यम् ।

यदि वयं नेत्राणि निमील्य रामरक्षां जपं कुर्वन् मणिपुरचक्रे प्रति मनः केन्द्रीकुर्मः तर्हि अस्माकं चक्रं निश्चितरूपेण सक्रियं भविष्यति तथा च 'र' अक्षरस्य निरन्तर-उच्चारणेन उत्पन्ना ऊर्जा तेषु चक्रेषु इन्द्रियेषु च नाडीं शुद्धं सुदृढं च करिष्यति l

फलतः तत्सम्बद्धाः रोगाः अपि अन्तर्धानं भविष्यन्ति । अत एव वृद्धाः जनाः राम, भाई राम इति वदन्ति स्म, यदा कस्यचित् मृत्योः अनन्तरं स्वपितृभ्यः स्वस्य अन्त्येष्टौ नेतुं समये राम राम इति वदन्ति । अस्माकं स्वास्थ्यं परस्य च स्वास्थ्यं निर्वाहयितुम् अस्माभिः राम राम, ..राम राम* इति अक्षराणां उच्चारणं कृत्वा पुनः पुनः रामराम परिपालनं अपि कर्तुं शक्नुमः। पूर्वं Good morning, Good evening, Hello, Hi इत्यादीनि निरर्थकानि अभिवादनानि त्यक्त्वा जिह्वा परिवर्तयितुं मासः यावत् समयः अभवत्। क्रमेण एतावता अभ्यस्तः अभवत् यत् अधुना रामरामः स्वयमेव मुखात् बहिः आगच्छति परस्य मुखेन अपि रामरामः शृण्मः । अनुजभ्रातरः, स्थानीयविदेशीयमित्राः अपि भवता सह आनन्देन वार्तालापं कर्तुं आरभन्ते इति भावः अनुभवः च अविस्मरणीयः अस्ति।

....संकलितम् अनुवादितम्

..... सुधा साठ्ये मुंबई।

sudha_sathaye@yahoo.com

# त्रिपुरायां अन्तःमहाविद्यालयीय युवसम्मेलने कुमारभास्करवर्मसंस्कृतपुरातनाध्ययन-विश्वविद्यालयस्य सन्तोषजनक-साफल्यम्



**हिमसंस्कृतवार्ताः नयनज्योतिशर्मा, अगरतला**

त्रिपुरायाः ICFAI इति विश्वविदकयालये समुपस्थिते ३८ तम संख्यकं भारतीय-विश्वविद्यालयीय-सङ्घेन नहीं आयोजिते उत्तरपूर्वाञ्चलक्षेत्रीय अन्तः विश्वविद्यालयीय युवमहोत्सवे असमराज्यस्य कुमारभास्करवर्मसंस्कृतपुरातनाध्ययनविश्वविद्यालयपक्षतः अंशग्रहणकारी ३१संख्यापरिमितं छात्रगणेन सास्कृतिक शोभायात्रायां द्वतीयस्थानम् अधिग्रहणम् अकरोत्। तदनु तैः शास्त्रीयनृत्येऽपि द्वितीयः, नृत्यप्रतियोगितायाः शाखायां तृतीयः एवम् एकाङ्क-नाटकप्रतियोगितायां पञ्चमस्थानम् अधिग्रहणम् अकरोत्। गणोऽयम् विश्वविद्यालयस्य असयीयविभागस्य अध्यापकः डॉ अजीतभरालीवर्यस्य नेतृत्वेन गतवान् इति।

# अनुसन्धानसम्बद्धकार्यार्थं अनुदानं समर्पणम् डॉ नन्दितागोस्वमीमहोदयायाः महानुभावः



*हिमसंस्कृतवार्ताः- नयनज्योतिशर्मा, गुवाहाटी।* गतमंगलवासरे कुमारभास्करवर्म-संस्कृतपुरातनाध्ययन- विश्वविद्यालयस्य कार्यकारीपरिषदः सदस्या, गुवाहाटीस्थ कटनमहाविद्यालयस्य प्राक्तन- उपाध्यक्षा डॉ. नन्दितागोस्वमीमहोदया संस्कृतमातुः सेवार्थम् इत्युक्ते अनुसन्धानकार्यार्थम् उपयोगहेतवे ₹ २०००००/ (द्विलक्षरूप्यकानि) अर्थसाहाय्यं कुलपति प्रो. प्रह्लाद रा. जोशीवर्याय दत्तवती। महोदयायाः एतादृशिकार्यं सजाजहिताय तथा प्रेरणादायकत्वेन इति मत्वा विश्वविद्यालयपक्षतः कुलपतिना तां प्रति धन्यवादं विज्ञापितवान्। बौद्धिकसमाजेऽपि गोस्वामीवर्यायाः कार्यमिदं सर्वस्तरं प्रशंस्यन्ते।

## ||ॐ||
## "वन्दे संस्कृतमातरम्"
## "लौकिकन्यायकोशः"
## "कपिञ्जलन्यायः"

ब्राह्मणग्रन्थेषु "कपिञ्जलानालभेत्" इति विधिः कश्चन दृश्यते। कपिञ्जलपक्षिणां बलिः अनेन विधिवाक्येन बोध्यते। परन्तु कति पक्षिणः बलिरूपेण समर्पणीया इति स्पष्टं न कथितम्। मूलवाक्ये बहुवचनप्रत्ययस्य कारणेन इयं शङ्का भवति। तस्याः समाधानम् एवं भवति यत्- बहुवचनकारणेन न्यूनतमपक्षे त्रयाणां कपिञ्जलपक्षिणां बलिः अभिप्रेतः इति संयुक्तिकः अर्थः। व्याकरणादि- विशिष्ट- संकेतेभ्यः वाक्यार्थः प्राप्तव्य इति बोधयितुम् अस्य न्यायस्य प्रयोगः क्रियते।

(जैमिनिसूत्रम् ११- १- ३८- ४६)

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे/महाराष्ट्रम्**

**हिमसंस्कृतवार्ताः,**
डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

## *सामान्यज्ञानम्*

प्रश्नः 1. गुरु- गोविन्द- सिंह क्रीडाङ्गणम् (क्रिकेट) कुत्र अस्ति?
उत्तरम् : नांदेड़ (महाराष्ट्रे)
प्रश्नः 2. 'देवीशतकम्' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - 'आनन्दवर्धनः'।
प्रश्नः 3. 'स्नानाय इदम्' इत्यस्य समस्त पदं किम्?
उत्तरम्- स्नानार्थम्। (चतुर्थीतत्पुरुषः)
प्रश्नः 4. 'मनोबलः' इत्यस्य सन्धि-विच्छेदं कुरुत-
उत्तरम्- 'मनः + बलः'।
प्रश्नः 5. भूमध्यरेखा कतिषु देशेषु गच्छति?
उत्तरम् – त्रयोदशसु देशेषु।

# लीबियादेशात् अष्टादशभारतीयनागरिकाः मुक्ताः भविष्यन्ति

हिमसंस्कृतवार्ताः। लिबिया-देशस्य भारतीयदूतावासेन लिबिया-देशस्य बेङ्गाजी नगरात् अष्टादशभारतीयनागरिकाणां पुनरागमनं सुकरं कृतम्। ते देशे समायास्यन्ति। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सामाजिकान्तर्जालीय माध्यमेन सूचितवान् यत् एते भारतीयाः लिबिया-देशे कार्यार्थम् अगच्छन् सम्प्रति तत्र अवरुद्धाः वर्तते ।

# संस्कृतविद्यास्थानानि- ४६
# निरुक्तवेदाङ्गम्

-श्री अभिजित् तोडकरः,महाराष्ट्रम्-9145908156

निरुक्तमिति वेदाङ्गं वेदपुरुषस्य श्रोत्रम् इति कथितम्। एतस्य वेदाङ्गस्य द्वौ एव अधिकृतग्रन्थौ प्राप्येते– निघण्टुः तथा यास्ककृतं निरुक्तम्। तथापि दुर्गाचार्यः वदति "निरुक्तं चतुर्दशप्रभेदम्" इति। निरुक्ते यास्केन आग्रायणः, औपमन्यवः, औदुम्बरायणः, गालवः, स्थौलाष्ठीविः, शाकपूणिः, गार्ग्यः, कौत्सः इत्यादीनां द्वादशनैरुक्तानाम् उल्लेखः कृतः। एतेषां ग्रन्थानाम् अनुपलब्धेः कारणात् यास्कस्य निरुक्तमेव प्राधान्यं भजते।

वेदादनन्तरं यैः वेदः साक्षात्कृतः तैः ऋषिभिः सः अन्येभ्यः ऋषिभ्यः पाठितः। तथापि वेदज्ञानस्य काठिन्यात् वेदपठनात् ते अन्ये असाक्षात्कृतवेदाः ऋषयः अग्लायन्त। अतः स्वस्य अर्थावगमसौकर्यार्थं निघण्टुनामकं ग्रन्थं ते रचितवन्तः यस्मिन् वेदमन्त्रेभ्यः कठिनशब्दाः समाहृत्य एकत्रीकृताः सन्ति। साक्षात्कृतधर्माणः ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणाय इमं ग्रन्थं समाम्नासिषुर्वेदं वेदाङ्गानि च।

परम्परया कश्यपप्रजापतिः मुख्यत्वे निघण्टोः रचयिता इति मन्यते। निघण्टौ पञ्चसु अध्यायेषु १३४१ शब्दाः परिगणिताः सन्ति। तस्य प्रथमः शब्दः गो इति अन्तिमश्च देवपत्नी इति।

तथापि एतेषां शब्दानाम् अर्थनिर्वचनम् अवशिष्टम् आसीत्। तत्कार्यं यास्काचार्येण निरुक्तग्रन्थे कृतम्। यास्कस्य कालः इसवीयात् पूर्वं सप्तमम् अष्टमं वा शतकमिति विदुषां मान्यता।निर् उपसर्गपूर्वात् वच्धातोः भावार्थे क्तप्रत्यये कृते निरुक्तशब्दः सिध्यति। निरुच्यते निःशेषं प्रतिपाद्यते निर्वचनविधया तत्तदर्थावबोधाय पदजातं यत्र इति निरुक्तशब्दस्य अर्थः। एतस्मिन्निर्वचने (व्याख्याने) पदानां यावन्तः सम्भाविताः अवयवार्थाः तावन्तः सर्वे निःशेषम् उच्यन्ते। अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम् इति सायणः। अर्थात् निरुक्ते पदानाम् अर्थाः स्वतन्त्रतया अन्यशास्त्रस्य साह्यं विना प्रतिपादिताः सन्ति। निरुक्तग्रन्थः नैघण्टुककाण्डं ऐकपदिक/ नैगमकाण्डं तथा च दैवतकाण्डम् एतेषु त्रिषु काण्डेषु विभक्तः। एतस्मिन् १४ अध्यायाः सन्ति। अधवयायाश्च पुनः पादेषु विभक्ताः। निघण्टुतः २३० शब्दानां तथा च अन्येषामपि बहूनां शब्दानां व्याख्यानं निरुक्तग्रन्थे लभ्यते। एवमाहत्य १७७१ शब्दाः अत्र विवृताः सन्ति। निरुक्तस्य शब्दशास्त्रीयाः पञ्च प्रतिपाद्यांशाः उक्ताः:- वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः, विविधेषु अर्थेषु धातूनां प्रयोगःच।

**वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।**

यास्केन पदानां चतुर्धा विभाजनं कृतम्। नाम, आख्यातम्, उपसर्गः निपातश्च। तन्मतेन सर्वे संज्ञाशब्दाः (नामानि) आख्यातजाः सन्ति।

**निरुक्ते कृतं निर्वचनं द्विविधम्–**

शब्दनिर्वचनम् अर्थनिर्वचनं च। शब्दनिर्वचने शब्दस्य प्रकृतिः तस्यां जायमानाः वर्णविकाराः वर्णागमाः वा प्राधान्यम् आवहन्ति। व्यवहारे विद्यमानानां ध्वनिसाम्ययुतानां शब्दानामाधारेण एतत् निर्वचनं प्रवर्तते। उदाहरणार्थं पुत्रशब्दस्य निर्वचने पुत् तथा त्र एतौ द्वौ अंशौ तेन कल्पितौ। सहस्रशब्दस्य च सहस् इति समानध्वनियुतात् शब्दात् उत्पत्तिः कल्पिता अस्ति।

अर्थनिर्वचने वर्णसाम्यस्य अपेक्षया अर्थसाम्यम् आदाय निर्वचनं भवति। उदाहरणार्थम् समभिद्रवन्ति एनम् आपः इति समुद्रः, व्यादाय हन्ति इति व्याघ्रः। यद्यपि शब्दशास्त्रदृष्ट्या निरुक्तं पञ्चविधं तथापि विषयवस्तुदृष्ट्या तत् द्विविधम्– मन्त्रनिर्वचनं तथा देवतानिर्वचनं च।

निघण्टुशब्दानां निर्वचनसमये तदा तदा मूलमन्त्रान् यास्कः वेदात् उद्धरति। आहत्य ८०० मन्त्राः तेन उद्धृताः सन्ति। तेषु ४४० मन्त्राणां व्याख्यानं निरुक्ते कृतम्। देवतानिर्वचने प्रथमं दैवतशास्त्रस्य आधारभूतसिद्धान्तान् आदौ निरूप्य अनन्तरं सः देवतानां स्वरूपमपि स्पष्टीकरोति। देवतानाम् आध्यात्मिकम्, आधिदैविकम् आधिभौतिकं चेति त्रिविधं स्वरूपं सः उपस्थापयति। सर्वाणि नामानि धातुजानि इति शाकटायनस्य मतं यास्केन अनुमतम् आधुनिकभाषाविज्ञानेऽपि नितान्तं महत्त्वपूर्णम्।


अथ प्रथमोऽध्यायः ।

गौः । ग्मा । ज्मा । क्ष्मा । क्षा । क्षमा । क्षोणी । क्षितिः । अवनिः । उर्वी । पृथ्वी । मही । रिपः । अदितिः । इळा । निर्ऋतिः । भूः । भूमिः । पूषा । गातुः । गोत्रेति पृथिव्याः १

हेम । चन्द्रम् । रुक्मम् । अयः । हिरण्यम् । पेशः । कृशनम् । लोहम् । कनकम् । काञ्चनम् । भर्म । अमृतम् । मरुत् । दत्रम् । जातरूपमिति हिरण्यस्य २

अम्बरम् । वियत् । व्योम । बर्हिः । धन्व । अन्तरिक्षम् । आकाशम् । आपः । पृथिवी । भूः । स्वयम्भूः । अध्वा । पुष्करम् । सगरः । समुद्रः । अध्वरमित्यन्तरिक्षस्य ३

# ।। श्रीरामायणकथा ।।





हिमसंस्कृतवार्ता, ✎प्रदीपः
pradipnath997@gmail.com

## उत्तरकाण्डम्!
## (त्रिषष्टितमः सर्गः)
## रामस्य समीपं ब्रह्मर्षेः गार्ग्यस्य आगमनम्।
## (द्वितीयः खण्डः)

ब्रह्मर्षिणा गार्ग्येण सह सेनापतिं भरतं प्राप्तं श्रुत्वा केकयाधिपः युधाजित् परां प्रीतिम् उपागच्छत्। ततः त्वरमाणः केकयाधिपः युधाजित् महता जनौघेन सह गन्धर्वदेशं प्रति प्रस्थानम् अकरोत्। राजा युधाजित् भरतश्च लघुविक्रमैः सह सबलौ सपदानुगौ शीघ्रं हि गन्धर्वनगरं प्राप्तौ। भरतं सम्प्राप्तं श्रुत्वा तत्रत्याः महाबलाः योद्धुकामाः गन्धर्वाः सिंहनादम् अकुर्वन्। ततः लोमहर्षणं तुमुलं युद्धम् अभवत्। तत्र खड्गशक्तिधनुर्भिः तेषां सप्तरात्रं महद् युद्धम् अभवत् किन्तु तदानीं तयोः कस्यचिदपि विजयः नाभवत्। ततः क्रुद्धः भरतः संवर्तं नाम कालस्य सुदारुणम् अस्त्रं गन्धर्वेषु अक्षिपत्। तेन कालपाशेन बद्धाः विदारिताः क्षणेन तिस्रः कोट्यः गन्धर्वाः निहताः अभवन्। तद्युद्धं तादृशं घोरं देवाः अपि न स्मरन्ति स्म यत् निमेषान्तरमात्रेण तादृशानां महात्मनां नाशः अभवत्। ततः तेषु सर्वेषु हतेषु भरतः तत्र गन्धर्वदेशे पुरद्वयं कृत्वा तक्षं तक्षशिलायां पुष्कलं च पुष्कलावते न्यवेशयत्। ते द्वे अपि पुरे धनरत्नौघसङ्कीर्णे काननैः शोभिते आस्ताम्। तत्र पुरद्वये अपि जनाः धर्मपरायणाः अभवन्। तत् पुरद्वयम् उद्यानयानसम्पूर्णम् आपणशोभितं गृहमुख्यैः सुरुचिरैः विमानैर्बहुभिर्वृतम् अभवत्। एवं श्रीमान् भरतः तस्मिन् पुरद्वये पुत्रद्वयं निवेश्य स्वयं तत्र पञ्चवर्षाणि उषित्वा अयोध्यां पुनरायात्। अयोध्याम् आगत्य ब्रह्मदेवमिव वासवः कैकेयीसुतः भरतः साक्षाद्धर्ममिवापरं महात्मानं राघवम् अभ्यवादयत्। रामचन्द्रोऽपि तत्रत्यं सर्वं वृत्तान्तं श्रुत्वा अत्यन्तं सन्तुष्टः अभवत्।

# अकर्मण्यः भक्तः

शास्त्री दिलीपः, रंगस (नादौनम्) हमीरपुरम्

पुरा एकः भक्तः आसीत्। सः प्रतिदिने भक्त्या ईष्टस्य स्तुतिं करोति स्म, प्रार्थयति च स्म- "हे देव! कृपया मह्यं आरोग्यं ददातु, धनं ददातु, साहाय्यं च करोतु"। परन्तु सः किञ्चित् अपि प्रयत्नं न करोति, कार्यम् अपि न करोति स्म। ईश्वरः एव तस्य साहाय्यम् करिष्यति इति तस्य विश्वासः आसीत्।

एकस्मिन् दिने सः वृषभशकटे गच्छति स्म। मृण्मार्गः आसीत्। तदैव वृष्टेः आरम्भः जातः। होरात्रयं यावत् वृष्टिः वर्षिता। तदा तस्य शकटस्य चक्रमेकम् मार्गे अन्तः गतम्। सः तथैव मार्गे उपविश्य पुनः प्रार्थयति- "हे देव! कृपया साहाय्यं करोतु, अहं तव परमभक्तोऽस्मि अतः साहाय्यं करोतु। कृपया साहाय्यं करोतु मे"।

तदा मार्गे एकः सज्जनः आगतवान् । भक्तम् दृष्ट्वा पृष्टवान् "भो मित्र किंचित् साहाय्यम् आवश्यकम् अस्ति? तर्हि अहं करोमि?"। तदा भक्तः उक्तवान्- "भवतः साहाय्यम् न आवश्यकम् यतोहि ईश्वरभक्तोऽस्म्यहं सः एव मम सहायकः सः एव साहाय्यम् करिष्यति"। तद् वचनं श्रुत्वा चकितः सज्जनः ततः गतवान्।

किंचित समयानन्तरम्, अन्यः एकः विनम्रः पुरुषः तस्मात् मार्गात् आगतवान्। सः अपि तदेव पृष्टवान् "भो मित्र! किंचित् साहाय्यम् आवश्यकं वा न वा?"। भक्तः पुनः उक्तवान् "भवतः साहाय्यं न आवश्यकम्। अहं भक्तोऽस्मि, अतः ईश्वरः स्वयमेव साहाय्यम् करिष्यति"। सः भद्रपुरुषः अपि गतवान्। शनैः शनैः वृष्टिः अधिका अभवत्। वर्धितं जलं तस्य अर्धशरीरपर्यन्तम् आगतम्। तदा पुनः एकः पथिकः आगतवान्, पृष्टवान् च- "भो मित्र! किंचित् साहाय्यम् आवश्यकम् अस्ति? तदा भक्तः पुनः तथैव पूर्ववत् एव उक्तवान्



"भवतः साहाय्यम् न आवश्यकम्। सः पथिकः अपि गतवान्। वर्धितं जलं तस्य कण्ठात् अपि उपरि आगतवान्। शीघ्रमेव सः वृषभौ सहितमेव जले निमज्जितः मृतश्च।

मृत्योऽनन्तरं सः स्वर्गम् गतवान्। सः च ईश्वरेण पृष्टः:- हे मानव! कथं मृतः? सः च- "हे देव! अहम् भवतः परमभक्तोऽस्मि। यदा कष्टे आसम् तदा भवता किञ्चिदपि साहाय्यं न कृतम्। भवान् तु द्रष्टुम् अपि न आगतवान्। किमर्थम्?

तदा ईश्वरः उक्तवान् "भो भक्त! जानामि अहं यत् त्वं मम भक्तोऽसि परन्तु अतीव मूर्खोऽपि असि! अहम् त्रिवारम् आगत्य पृष्टवान् च यत् साहाय्यम् अवश्यकम् वा न वा?" इति। परन्तु त्वया तत् न स्वीकृतम्। यदि भवान् प्रयत्नम् एव न करिष्यति। अहम् कथम् साहाय्यम् करिष्यामि?

श्रुत्वा च भक्तः अतीव दुखितः जातः।

उक्तमपि-
उद्यमः साहसं धैर्यं बुद्धिः शक्तिः पराक्रमः।
षडेते यत्र वर्तन्ते तत्र देव साहाय्यकृत्॥

*शिक्षा- यदि वयं प्रयत्नं कुर्मः तर्हि एव ईश्वरः साहाय्यं करोति।*